69

म २:४२
* ३७६
९६२

शि. प्र. मंडळी, पुणे ९.
मीमांसा विद्यालय
卐 ग्रंथालय 卐

ग्रंथ नाव यज्ञोपवीत मंत्र

लेखक

20 MAY 1980

९३२

( आश्वलायन व तैतीर्य ब्राह्मणांकरितां. )

# ॥ अथयज्ञोपवीतमंत्रः ॥

य॰ श्रीगणेशायनमः॥श्रीसरस्वत्यैनमः॥श्रीगुरुभ्योनमः॥ ॐ केशवायनमः मं॰

१ ॥नारायणायनमः॥श्रीकृष्णायनमः॥ॐ भूः ॐ भु॰ स्व॒रों॥अद्यपूर्वो

च्चरितवर्तमानएवंगुणविशेषणविशिष्टायांशुभपुण्यतिथौममआत्मनः

श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थंश्रौतस्मार्तकर्मानुष्ठानसिध्यर्थंयज्ञो

पवीतसंस्कारमहंकरिष्ये॥आपो॒हिष्ठाम॑यो॒भुव॒स्तान॑ऊ॒र्जेद॑धातन॥म॒हे

रणा॑य॒चक्ष॑से॥योवः॑शि॒वत॑मो॒रस॒स्तस्य॑भाजयते॒हनः॥उ॒श॒तीरि॑वमा॒तरः॑ १

तस्मा॒अरं॑गमामवो॒यस्य॒क्षया॑य॒जिन्व॑थ॥आपो॑ज॒नय॑थाचनः॥हिरण्य

वर्णाःशुचयःपावकायासुजातःकश्यपोयास्विंद्रः ॥अग्निंयागर्भंदधिरे
विरूपास्तानआपःशंस्योनाभवंतु ॥यासांराजावरुणोयातिमध्येसत्या
नृतेअवपश्यंजनानां॥मधुश्चुतःशुचयोयाःपावकास्तानआपःशंस्यो
नाभवंतु॥यासांदेवादिविकृण्वंतिभक्षंयाअंतरिक्षेबहुधाभवंति॥याः
पृथिवींपयसोंदंतिशुक्रास्तानआपःशंस्योनाभवंतु॥शिवेनमाचक्षुषा
पश्यतापःशिवयातनुवोपस्पृशतत्वचंमे॥सर्वांअग्नींरप्सुषदोहुवेवोम
यिवर्चोबलमोजोनिधत्त॥पवमानःसुवर्जनः॥पवित्रेणविचर्षणिः॥यःपो

य· तासपुनातुमा ॥ पुनंतुमादेवजनाः ॥ पुनंतुमनवोधिया ॥ पुनंतुविश्वेआयवः ॥ मं·
२ जातवेदः पवित्रवत् ॥ पवित्रेणपुनाहिमा ॥ शुक्रेणदेवदीद्यत् ॥ अग्नेक्रत्वा
क्रतूंऽरनु ॥ यत्तेपवित्रमर्चिषि ॥ अग्नेविततमंतरा ॥ ब्रह्मतेनपुनीमहे ॥ उभा
भ्यांदेवसवितः ॥ पवित्रेणसवेनच ॥ इदंब्रह्मपुनीमहे ॥ वैश्वदेवीपुनतीदे
व्यागात् ॥ यस्यैबह्वीःस्तनुवोवीतपृष्ठाः ॥ तयामदंतःसधमाद्येषु ॥ वय-
ँ स्यामपतयोरयीणां ॥ वैश्वानरोरश्मिभिर्मापुनातु ॥ वातःप्राणेनैषिरो २
मयोभूः ॥ द्यावापृथिवीपयसापयोभिः ॥ ऋतावरीयज्ञियेमापुनीतां ॥

बृहद्भिःसवितःस्तृभिः॥वर्षिष्ठैर्देवमन्मभिः॥अग्नेदक्षैःपुनाहिमा॥येनदेवा
अपुनत॥येनापोदिव्यंकशः॥तेनदिव्येनब्रम्हणा॥इदंब्रम्हपुनीमहे॥यः
पावमानीरध्येति॥ऋषिभिःसंभृतꣳरसं॥सर्वꣳसपूतमश्नाति॥स्वदितं
मातरिश्वना॥पावमानीर्योअध्येति॥ऋषिभिःसंभृतꣳरसं॥तस्मैसर
स्वतीदुहे॥क्षीरꣳसर्पिर्मधूदकं॥पावमानीःस्वस्त्ययनीः॥सुदुघाहिप
यस्वतीः॥ऋषिभिःसंभृतोरसः॥ब्राम्हणेष्वमृतꣳहितं॥पावमानीर्दिशं
तुनः॥इमंलोकमथोअमुं॥कामान्समर्धयंतुनः॥देवीर्देवैःसमाभृताः॥

पावमानीः स्वस्त्ययनीः ॥ सुदुघाहि घृतश्चुतः ॥ ऋषीभिः संभृतोरसः ॥ ब्राह्मणे
ष्वमृतꣳहितं ॥ येनदेवाः पवित्रेण ॥ आत्मानंपुनतेसदा ॥ तेनसहस्रधारेण
॥ पावमान्यः पुनंतुमा ॥ प्राजापत्यंपवित्रं ॥ शतोद्यामꣳहिरण्मयं ॥ तेनब्रह्म
विदोवयं ॥ पूतंब्रह्मपुनीमहे ॥ इंद्रः सुनीतीसहमापुनातु ॥ सोमः स्वस्त्या
वरुणः समीच्या ॥ यमोराजाप्रमृणाभिः पुनातुमा ॥ जातवेदामोर्जयंत्यापुना
तु ॥ भूरग्निंचपृथिवींचमांच ॥ त्रीꣳश्चलोकान्संवत्सरंच ॥ प्रजापतिस्त्वासा
दयतु ॥ तयादेवतयांगिरस्वद्ध्रुवासीद ॥ भुवोवायुंचांतरिक्षंचमांच ॥ त्री-

९ श्चलोकान्त्संवत्सरंच॥ प्रजापतिस्त्वासादयतु॥ तयादेवतयांगिरस्वद्ध्रुवासी
द॥ स्वेरादित्यंचदिवंचमांच॥ श्रीं॰ श्वलोन्त्संवत्सरंच॥ प्रजापतिस्त्वासाद
यतु॥ तयादेवतयांगिरस्वद्ध्रुवासीद॥ भूर्भुवः स्वः श्चंद्रमसंचदिशश्चमां
च॥ श्रीं॰ श्वलोकान्त्संवत्सरंच॥ प्रजापतिस्त्वासादयतु॥ तयादेवतयां-
गिरस्वद्ध्रुवासीद॥ ॐकारं प्रथमतंतौन्यसामि॥ अग्निंद्वितीयतंतौन्यसा
मि॥ नागान्तृतीयतंतौन्यसामि॥ सोमंचतुर्थतंतौन्यसामि॥ पितॄन्पंचम
तंतौन्यसामि॥ प्रजापतिंषष्ठ तंतौन्यसामि॥ वायुंसप्तमतंतौन्यसामि॥

सूर्यंअष्टमतंतौंन्यसामि ॥ विश्वान्देवान्नवमतंतौंन्यसामि ॥ उद्वयंतमसस्परि
पश्यंतोज्योतिरुत्तरं ॥ देवंदेवत्रासूर्यमगन्मज्योतिरुत्तमं ॥ उदुत्यंजातवेदसंदेवंवहंतिकेतवः ॥ दृशे
विश्वायसूर्यं ॥ चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः ॥ आप्राद्यावापृथिवीअंतरिक्षꣳ
सूर्यआत्माजगतःस्तस्थुषश्च ॥ त्रिस्ताडयेत् ॥ अद्यपू॰ प्राप्त्यर्थं ॥ श्रौतस्मार्तकर्मानुष्ठानसिध्यर्थं
यज्ञोपवीतधारणमहंकरिष्ये ॥ यज्ञोपवीतंपरमंपवित्रंप्रजापतेर्यत्सहजंपुरस्तात् ॥ आयुष्यमग्र्यंप्रतिमुंचशुभ्रंयज्ञोपवीतंबलमं-

स्तुतेजः ॥ दशगायत्रीः जपित्वा ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ ७ ॥

हें पुस्तक, पुणें पेठ सदाशिव येथें नारोआपाजी गोडबोले यांणीं आपले वृत्तप्रसारक छापखान्यांत छापिलें तारीख ५ डिसेंबर सन १८७६ इ० आवृत्ति १ ली किंमत ०२

९३२

॥ इतियज्ञोपवीतमंत्रः ॥